# (इष्णुच्प्रत्ययः एकमवलोकनम्।)

## 1.रोचिष्णुः।

*(डा.वि.आर्.मनोज्,व्याख्याता,श्री चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः,काञ्ची।)*

देवाः रावणादिराक्षसशल्यापनोदनाय ब्रह्माणं पुरस्कृत्य भगवन्तं प्रार्थयामासुः।भगवान्, दशरथपुत्रतां प्राप्य रावणं हनिष्यामि तेन काश्यपोऽपि पूर्णमनोरथो भविष्यतीति देवानुवाच। काश्यपः खलु कदाचित्परमं तपस्तप्त्वा भगवन्तं पुत्रत्वेनैच्छत्। स एवेदानीमयोध्याधिपो दशरथः। एवं भगवान् दशरथपुत्रतां प्राप्य तं पर्यतोषयत्। रामे जाते दशरथः आनन्दसिन्धावात्मानमवगाह्य नितरां रेमे। एवं काले गच्छति कदाचित् विश्वामित्रो महामुनिः स्वयज्ञरक्षार्थं दशरथाद्राममयाचत। बालं रामं कानने मुनिना सह सम्प्रेष्य रामवियोगमसहमानः नितरां पर्याकुलोऽभूद्राजा दशरथः। ततः क्षत्रियब्राह्मणयोः रक्षकशिक्षकयोर्वा परस्परसम्बन्धदृढतया स्वविवेकस्यामोघतयापि स्वप्रस्तावस्यौचितीं दर्शयति मुनिः। राजा च स्वविवेकेन सुतसमर्पणमेव निश्चिकाय। सफलमनोरथो विश्वामित्रः रामेण सह विनिर्गतः। मुनिमनुगन्तारं रामं लक्ष्मणोऽप्यनुजगाम। तदाह भट्टिः –

"प्रयास्यतः पुण्यवनाय जिष्णो रामस्य **रोचिष्णु**मुखस्य धृष्णुः।
त्रैमातुरः कृत्स्नजितास्त्रशस्त्रसध्र्यङ्रतः श्रेयसि लक्ष्मणोऽभूत्।।" इति। (भट्टिकाव्यम्.1.25.)

प्राप्तसर्वप्रहरणः कल्याणकर्मण्यासक्तः तृतीयमातृपुत्रः (सुमित्रानन्दनः) त्रिमातृपुत्रो वा प्रगल्भः सौमित्रिः पावनकाननाय प्रैष्यतः **रोचिष्णु**मुखस्य विजयिनो रामस्य सहचरो बभूवेत्यर्थः।

किमिति रोचिष्णुमुखस्य ? प्रदीप्ताननस्येत्यर्थः। 'विभ्राड् भ्राजिष्णुरोचिष्णू' इत्यमरः। अतिशयेन शोभमानस्येत्याशयः।

यागसमाप्त्यनन्तरं मुनिः रामलक्ष्मणाभ्यां मिथिलामगमत्। तत्र रामः सीतानिमित्तं राज्ञा समुपकल्पितं धनुर्बभञ्ज। रामपराक्रमसन्तुष्टो मिथिलेशो जनकः सीतां रामाय प्रादात्। लक्ष्मणादिभ्योऽपि स्वभ्रातृकन्याः समर्पितवान्। उद्वाहानन्तरमयोध्यां प्राप्य रामादयः सुखं वसन्ति स्म। ततः कदाचिद्राजा दशरथः रामं यौवराज्येऽभिषेक्तुं समारभत। तदा मन्थरादूषिताशया कैकयी राज्ञा पुरा दत्तेन वरद्वयेन रामस्य वनवासं भरतस्याभिषेकं च वरयामास। पितृवाक्यपरिपालनाय सीतालक्ष्मणाभ्यां सहितो रामो वनाय प्रातिष्ठत। रामं प्रवासितं निशम्य तं प्रतिनिवर्तयितुं भरतः उद्यमं चक्रे। किन्तु रामः भरताभ्यर्थनां निराचकार। पौरागमनचिन्तया निवृत्तभरतः रामोऽत्रेस्तपोवनं ततो दण्डकारण्यञ्चावसत्। तत्र विराधवधानन्तरं शरभङ्गमुनिनिर्दिष्टसुतीक्ष्णाश्रममगमत्। तत्र कृतोटजनिवासं मुनिगणरक्षातत्परं रामं सर्वानर्थमूलं शूर्पणखा अभिसरति। तत्र सा राममूढं दृष्ट्वा तमवज्ञाय लक्ष्मणमभिसरति। तस्या विवाहाभ्यर्थनामुपक्षिपति व्यङ्ग्यध्वनिना लक्ष्मणमुखेन भट्टिः --

"मानुषानभिलष्यन्ती **<u>रोचिष्णु</u>**र्दिव्यधर्मिणी।
त्वमप्सरायमाणेह स्वतन्त्रा कथमञ्चसि।।" इति। (भट्टिकाव्यम्.**4.22.**)

रोचिष्णुः दिव्यसौन्दर्यशालिनी अप्सरः सदृशी स्वाधीना त्वमस्मिन् वने त्वदपेक्षया न्यूनान् मानवानिच्छन्ती किमर्थमटसीत्याशयः। रोचिष्णुः दीप्तिमतीत्यर्थः। लक्ष्मणस्तामभिसरन्तीं प्रत्यभिज्ञायाऽपि सव्यङ्ग्यमाक्षिपति। ततः स्वस्या अभ्यर्थनाभङ्गस्य कारणं सीतेति निश्चित्य सा सीतामभ्यद्रुवत्। क्रुद्धो लक्ष्मणस्तच्छ्रवणनासिके न्यकृन्तत्। अतिक्रुद्धया तयोद्दीपिताः खरदूषणादयो राक्षसा रामाग्नौ शलभीभूताः। ततस्सा रावणं सीताग्रहणाय प्रेरितवती। स सीतामाश्रमादचूचुरत्। रावणेनापहृतां सीतां मृगयन्तौ रामलक्ष्मणौ किष्किन्धां प्राऽपतुः। तत्र सुग्रीवेण सख्यं चक्रतुः। सुग्रीवेण सीतान्वेषणाय प्रतिज्ञातौ तौ वर्षर्तुयापनाय तत्रैवावसताम्। तथा च वर्षर्तुवर्णनाप्रसङ्गे भट्टिः --

“………**<u>रोचिष्णवः</u>** सविस्फूर्जा मुमुचुर्भिन्नवद् घनाः।।” इति। (भट्टिकाव्यम्.7.2.)

रोचिष्णवो मेघाः सस्यानां तृप्तिकरं जलं विदीर्णघटवत् ववृषुः इत्यर्थः। रोचिष्णुत्वं = दीप्तिमत्वमत्र तडित्वतां मेघानां विशेषणम्।

एवं सबलस्य श्रीकृष्णस्य युधिष्ठिरयागाय कृतं प्रस्थानं वर्णयन् मार्गे (रैवतकाद्रौ) स्कन्धावारसन्निवेशादिवर्णनप्रसङ्गे माघः --

“**<u>रोचिष्णु</u>**काञ्चनचयांशुपिशङ्गिताशा वंशध्वजैर्जलदसंहतिमुल्लिखन्त्यः।
भूभर्तुरायतनिरन्तरसंनिविष्टाः पादा इवाभिबभुरावलयो रथानाम्।।” इति। (शिशु.5.20.)

रोचिष्णुकाञ्चनचयानामंशुभिः पिशङ्गीकृता आशा याभिस्ताः तत्तद्राजकुलानां ध्वजैः प्रतिनियतकुलानामङ्कुशादिचिह्नितकेतुभिः मेघसंघातमुल्लिखन्त्यः दीर्घं सन्निविष्टाः रथानामावलयः भूभर्तू रैवतकाद्रेः प्रत्यन्तपर्वता इव भान्ति स्मेत्यर्थः। अत्र रोचिष्णुकनकचयांशुमत्वं रथावलीविशेषणम्। रोचनशीलानां शोभमानानां कनकचयानामंशुभिरिति भावः।

त्रेतायुगसम्बन्धिनीः रोचिष्णूनां कथाः इमे। द्वापरे खलु भगवान् लीलामानुषबालो नन्दननन्दनः यमुनापुलिनं गोपीगोपसमेतः पुण्यमतीव चकार। तस्यात्ममित्राणि पाण्डवाः। तेषामप्यर्जुनः मित्रतमः। स चाऽर्जुनः कदाचिदविचारितकर्मणा भग्नव्रतः प्रतिज्ञापालनाय वनं प्रविष्टः परमं तपस्तताप परमेश्वरप्रीत्यर्थम्। अर्जुनस्य शौर्यं परीक्षितुं भगवानपि निश्चिकाय। अत्रैव प्रसङ्गे भगवदर्जुनयोः बाहुयुद्धं वर्णयति भारविः किरातार्जुनीयस्याष्टादशकेऽध्याये। भाग्यवान् खलु पार्थः। कुत एवम् ? किमसौ रोचिष्णुः ? कुतः संशीतिः ! परमेश्वरेण खल्वसौ युयुधे। अर्जुनस्य सत्वातिशयं विलोक्य प्रसन्नो भगवान् स्वरूपं प्रकटयामास। तत्रैवेन्द्रादिदेवानामागमनं वर्णयन् भारविः --

“आसेदुषां गोत्रभिदोऽनुवृत्त्या गोपायकानां भुवनत्रयस्य।

**<u>रोचिष्णु</u>**रत्नावलिभिर्विमानैर्द्यौराचिता तारकितेव रेजे।। इति। (किरातार्जुनीयम्.18.18.)

गोत्रभिद इन्द्रस्यानुसरणेनाऽसन्नानां भुवनत्रयरक्षकाणां रोचिष्णुरत्नावलिभिर्विमानैः द्यौराकाशः तारकिता सञ्जाततारकेव रेजे इत्यर्थः। विमानविशेषणमत्र रोचिष्णुरत्नावलिमत्त्वम्। प्रकाशनशीला रत्नावलयो येषां विमानानां पुष्पकाणां तैराकाशः रेजे इति भावः।

आस्तां तावत्। कथमयं शब्दो निष्पन्नः ? 'रुच दीप्तावभिप्रीतौ च' (भ्वा.745) इत्यस्माद्धातोः "अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मद**रुच्य**पत्रपवृतुवृधुसहचर इष्णुच्" (पा.सू.3.2.136) इति सूत्रेण तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु इष्णु(च्) प्रत्ययो विधीयते। अयं कृत्प्रत्ययः अतः "कृत्तद्धितसमासाश्च" (पा.सू.1.2.46) इति इष्णुच्प्रत्ययान्तस्य प्रातिपदिकसंज्ञायां विभक्तिकार्ये **'<u>रोचिष्णुः</u>'** इति रूपम्। अतिशयेन शोभमान इत्यर्थः।

**<u>(1.रोचिष्णुः।)</u>**

## <u>2.उत्पतिष्णुः।</u>

देवसन्देशहरो ब्रह्मर्षिर्नारदः द्वारकां समागम्य शिशुपालस्य दौर्जन्यं कृष्णाय न्यवेदयत। अस्मिन्नेव काले यियक्षमाणेन युधिष्ठिरेणाप्याहूतः कार्यद्वयाकुलोऽभूत्कृष्णः। ततो भगवान् बलरामोद्धवाभ्यां सह सदः आसदत्। तत्र, "सहिष्ये शतमागाँसि सूनोस्त इति यत्त्वया। प्रतीक्ष्यं तत्प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम्।।" इत्युद्धवेन स्मारितः कृष्णः सैन्यसमेतः यागाय प्रातिष्ठत। युधिष्ठिरसभायामासन्नः शिशुपालः कृष्णं निनिन्द। युद्धार्थमेव शिशुपालः सन्नह्यत। तथा च सैन्यद्वयस्य समागमं तुमुलयुद्धञ्च वर्णयन् माघः –

"लूनग्रीवात्सायकेनापरस्य द्यामत्युच्चैराननाद**<u>ुत्पतिष्णोः</u>**।
त्रेसे मुग्धैः सैंहिकेयानुकाराद्रौद्राकारादप्सरोवक्त्रचन्द्रैः।।" इति। (शिशुपालवधम्.18.59.)

अपरस्य सायकेन लूनग्रीवाच्छिन्नकण्ठात् अत एव द्यामाकाशं प्रति आशु उच्चै**रुत्पतिष्णो**रुत्पतनशीलात्। अत एव सिंहिकाया अपत्यं पुमान्सैंहिकेयो राहुः, तमनुकरोतीति तदनुकारात्। तत्सदृशादित्यर्थः। रौद्राकाराद् भीषणाकृतेरस्य वीरस्य आननान्मुग्धैः सुन्दरैरप्सरसां वक्त्रैरेव चन्द्रैस्त्रेसे त्रस्तम्। अत्रराहुकेतुकत्रासस्य चन्द्र एव सम्भवाद्वक्त्रचन्द्रैरिति रूपकं सिद्धम्। तस्य सैंहिकेयानुकारादिति स्पष्टोपमापेक्षत्वात्सङ्करः। यथा राहुकेतुकत्रासस्य चन्द्रे सम्भवस्तद्वत् वीरस्य छिन्नकण्ठात् अप्सरसोऽभैषुरित्याशयः।

समरः सर्वस्य सर्वस्वमप्यपहरति। न केवलं नराणाममराणामपि। इतिहासादिपरिशीलनेनैतद् गम्यते यद् बहूनां कलहानां कारणं स्त्रिय इति। माघोऽपि –

'बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः।' इति। (शिशुपालवधम्.2.38.)

इति बलराममुखेन तदेव द्रढयति। नैतत्साम्प्रतम्। न खलु सर्वदा स्त्रियः कलहकारणम्। किमुत ? पुरुषा अपि। तस्यैव श्लोकस्य पूर्वार्द्धो द्रष्टव्यः।

'त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे।' इति खलु। तत्सत्यम्। तथापि रुक्मिणी कृष्णं कामयमाना एव कृष्णेनापहृता। न बलात्। अपहरणं किमु ? भीष्मकस्यपुत्री सा। शिशुपालाय वाग्दत्तकन्या। अतोऽपहृता कृष्णेन। यतः सा कृष्णं कामयमाना आसीत्। अथवा सर्वो विधिकृतः इत्यस्तु। शिशुपालादिदुष्टनृपरूपधरान्हन्तुमुपायभूताः स्त्रियः। विधेरियं कृतिः। किमर्थमिदानीमियं चर्चा ? प्रसङ्गादुक्तं तावद्विषयोपगमाय। अपरसायकच्छिन्नं वीरवदनमप्सरसां त्रासं चक्रे इत्युक्तम्। तच्च वदनम् उच्चैरुत्पतिष्णुरिति। शक्त्या सायकाघातेन छिन्नकण्ठः द्यामाकाशमुदपतदित्यर्थः। छिन्नकण्ठस्य न स्वाभाविक**मुत्पतिष्णुत्व**मुत्पतनशीलता। प्रत्युत सायकाघातेन (सायकवेगेन) तदपि आकाशे दूरं क्षिप्तमित्यर्थः। 'उत्पतिष्णुस्तूत्पतिता' इत्यमरः।

एवं रघुवंशे रघोः दिग्विजययात्रावर्णनवेलायां कालिदासः –

"ससञ्जुरश्वक्षुण्णानामेलाना**मुत्पतिष्णवः**।

तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः।।" इति। (रघुवंशः.**4.47.**)

अश्वैः क्षुण्णानामेलानामुत्पतिष्णव उत्पतनशीलाः फलरेणवः समानगन्धिषु मत्तेभानां गजानां कटेषु गजगण्डेषु ससज्जुः सक्ताः इत्यर्थः। किमिति फलगन्धतुल्यगन्धिषु मत्तेभकटेष्वित्युक्तम्। रघुसैन्ये उत्तमकुलजातगजानां सद्भावसूचनाय तदुपादानम्। रघोः पौत्रः खलु दशरथः। दशरथस्यायोध्यायां दिग्गजसम्भूताः वरवारणाः बहवोऽवर्तन्त। ततः पुरुषायुषद्वयपूर्ववर्तिनी कथा रघोः। तथा सति तस्य गजानां महिमानमवर्णनीयमेव खलु स्यात्! उत्तममत्तेभसम्भवं हि गन्धवत्वम्। किमुक्तमयोध्यायां दिग्गजसम्भूता गजा अवर्तन्त इति? किमुत! न मया तदुक्तम्। ऋषिप्रोक्तमन्ववादिषम्। श्रूयताम् –

"ऐरावतकुलीनैश्च महापद्मकुलैस्तथा।

अञ्जनादपि निष्क्रान्तैर्वामनादपि च द्विपैः।।" इति। (रामायणं, बालकाण्डम्.**6.24.**)

एवमचलसन्निभैरिभैरापूर्णा सुपरिरक्षिता सा नगरी 'सत्यनामा प्रकाशते' इत्यपि तत्रैवानुपदमेवोक्तं ऋषिणा। योद्धुमशक्या खल्वयोध्या! तदास्ताम्। किमभाणीदुपरिष्टात् उत्पतिष्णवः फलरेणवः इति! न खलु फलरेणव उत्पतिष्णव उत्पतनशीलाः स्वयम्। मार्द्दवाल्लाघवाच्चानायासेनोत्पतनयोग्या इत्यर्थः।

त्रिशिरसः पातानन्तरं शूर्पणखोद्दीपितौ तद् भ्रातरौ रामेण सह योद्धुमागतौ रणे चरतः। तद्वर्णयति भट्टिः –

"......**उत्पतिष्णू** ......चेरतुः खरदूषणौ" इति। (भट्टिकाव्यम्.**5.1.**)

शत्रुपराजयकरणशीलौ खरदूषणौ समरं परितः चेरतुरित्यर्थः। कीदृशौ ताविति चे**दुत्पतिष्णू** = ऊर्ध्वप्लुतिकरणशीलौ। प्रहारवञ्चनार्थमिति भावः।

"अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्" (पा.सू.3.2.136) इति सूत्रेण उत्पूर्वकात् 'पत्लृ गतौ' (भ्वा.845) इत्यस्माद्धातोः तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु इष्णु(च्) प्रत्ययः। **(2.उत्पतिष्णुः।)**

## 3.निराकरिष्णुः।

'यो यस्य विकारः स तमेव गच्छत्यान्तर्यतः।' इति सप्तमाह्निके "स्थानेऽन्तरतमः" (पा.सू.1.1.50) इति सूत्रभाष्ये भगवान् पतञ्जलिः। 'तद्यथा लोष्टः क्षिप्तः बाहुवेगं गत्वा नैव तिर्य्यग्गच्छति नोर्ध्वमारोहति पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः' इति। किमिदानीं भाष्यभणितीरुद्धर्तुकामः ? नहि ! सीतापरित्यागवर्णनविषयः स्मृतिपथमागतः। तत्रैवङ्कारं मनो निरगच्छत्। मनश्चञ्चलमस्थिरम्। "चञ्चलं हि मनः कृष्ण प्रमाधिबलवद्दृढम्" इत्यर्जुनः। मनः स्वेच्छाचारी सर्वस्यापि सामान्यजनस्य। विषयान्विषयान्तरैः सम्बध्नाति। ततस्तमेवविषयमुपधावति सर्वदा। ममापि तदेव संवृत्तम्। सीता च सितायाः प्रकटीभूता। अन्ततः भूमावेव खलु न्यलीयत। तदेवोक्तं पृथिवीविकारः पृथिवीमेव गच्छतीति। तदास्तां तावत्। रघुवंशे सीतापरित्यागवर्णनाप्रसङ्गे कालिदासः –

"न चावदद्भर्तुरवर्णमार्या **निराकरिष्णो**र्वृजिनादृतेऽपि।
आत्मानमेव स्थिरदुःखभाजं पुनः पुनर्दुष्कृतिनं निनिन्द।।" इति। (रघुवंशः.14.57.)

साध्वी सीता एनसो विनाऽपि निराकरिष्णोः भर्तुरपवादं नैवावादीत्। किन्तु स्थिरदुःखभाजमत एव दुष्कृतिनमात्मानं पुनः पुनः निनिन्देत्यर्थः। रामो निराकरिष्णुः = निरासकः। लोकापवादभिया सीतामहासीत् किल !

"पतिं या नाभिचरति मनोवाग्देहसंयता।
सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते।।" इति। (मनुस्मृतिः.9.29.)

भट्टिकाव्ये सनातनस्य विष्णोरवतारकतया दशरथस्य राज्ञो गुणवर्णनम्। ततस्तदीयराजधान्या अयोध्याया वर्णनानन्तरं कौसल्या - कैकयी - सुमित्रोद्वाहविधिः। ततो वाराङ्गनाभिरानीतस्य विभाण्डकसुतस्य नृपपुत्रेष्टियागसम्पादनम्। ततो रामलक्ष्मणभरतशत्रुघ्नोत्पत्तिः। तेषां शिक्षाधिगमनानन्तरं राक्षसोद्विग्नस्य विश्वामित्रस्य रामयाचनार्थं दशरथपार्श्वागमः। नृप - मुनिसंवादानन्तरमनिच्छतोऽपि नृपस्य ऋषिशापभीत्या लक्ष्मणानुगतस्य रामस्य तस्मै समर्पणमिति आद्यसर्गविषयाः। तत्र विश्वामित्र - दशरथयोः संवादसम्पादनाय दशरथः महर्षिं कुशलं पृच्छति –

"ऐषीः पुनर्जन्म जयाय यत्त्वं रूपादिबोधान्यवृतच्च यत्ते।
तत्त्वान्यबुद्ध्या प्रतनूनि येन ध्यानं नृपस्तच्छिवमित्यवादीत्।।" इति। (भट्टिकाव्यम्.1.18.)

इत्थं महर्षिसम्पत्तेः कुशलं पप्रच्छ। तदा दशरथमुत्तरयन्तपस्वी तेनैव सह स्वेष्टमपि प्रस्तौति –

"आख्यन्मुनिस्तस्य शिवं समाधेर्विघ्नन्ति रक्षांसि वने क्रतूंश्च।
तानि द्विष्द्वीर्य**निराकरिष्णु**स्तृणेढु रामः सह लक्ष्मणेन।।" इति। (भट्टिकाव्यम्.1.19.)

अर्थान्महर्षिः विश्वामित्रः स्वसमाधेः शिवं तथा वने राक्षसकृतं स्वयागध्वंसनं ततो यागरक्षार्थं लक्ष्मणान्वितो द्विषद्वीर्य**निराकरिष्णुः** रामो राक्षसान् हिनस्त्विति च दशरथमाचष्टेति भावः। किमिति द्विषद्वीर्य**निराकरिष्णुः** ? द्विषन् शत्रुः, तस्य वीर्यं = विक्रमं **निराकरिष्णुः** = विनाशीत्यर्थः। वैरिविक्रमविनाशीति रामविशेषणम्। 'निराकरिष्णुः क्षिप्नुः' इत्यमरः। निराकरणशील इत्यर्थः।

एवं योद्धुमागतयोः रणे चरतोः खरदूषणयोः वर्णनं कुर्वन् भट्टिः –

"**निराकरिष्णू ......** परितो रणम्। **......** चेरतुः खरदूषणौ।।" इत्यादि। (भट्टिकाव्यम्.5.1.)

**निराकरिष्णू** = शत्रुपराजयकरणशीलौ शूर्पणखाभ्रातरौ तौ खरदूषणौ समरं सर्वतः चक्रमतुरिति भावः। एवं सप्तमेऽध्याये वर्षर्तुवर्णनाप्रसङ्गे मेघवृष्टिमाख्याति –

"<u>**निराकरिष्ण**</u>वो भानुं ...... दिवम्" इत्यादि। (भट्टिकाव्यम्.5.1.)

भानुं = रविं <u>**निराकरिष्णवः**</u> = तिरस्कर्तारः दिवं द्याम् अभितः सर्वतो व्याप्ताः घनाः ववृषुरिति भावः। मेघाः सूर्यमप्याच्छादयन्ति। 'निर् + आङ् पूर्वकात् डुकृञ् करणे' (तना.1473) इत्यस्माद्धातोरिष्णुच्। <u>**(३.निराकरिष्णुः।)**</u>